श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

॥ श्रीराजगोपालविंशतिः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीराजगोपालविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

आनन्दबृन्दावनकेलिलोलं
श्रीनन्दगोवृन्दपदानुयायि।
सानन्दगोविन्दपदारविन्दम्
आनन्दबृन्दावनमातनोतु॥ **1** ॥

मधुरासविधे कार्मुकनगरे
मधुराकारं किञ्चन दैवम्।
विनतानन्दनविनुतं पुरतो
विनतानन्दनदायि विभाति॥ **2** ॥

धन्यतमश्रीभीष्मककन्या
मञ्जुलदक्षिणपार्श्वमुदारम्।
सत्यालङ्कृततदितरपार्श्वं
सत्यानन्दं वन्दे देवम्॥ **3** ॥

आगमसुरभिलमञ्जुलकविता
भासुरभूसुरसुरभूमीरुट्।
आसुरवञ्चनभूरिविलासः
कार्मुकपुरवरमुररिपुरिन्धे॥ **4** ॥

सकृत्सभक्ति प्रणतिं विधाय
धनुष्पुरीवल्लववल्लभाय।

जनोऽत्र यद्विन्दति संशृणुध्वं
जना ! मनोनन्दनहेतुभूतम् ॥ 5 ॥

पराङ्कुशत्वं परकालभावं
श्रीविष्णुचित्तत्वमतो महत्त्वम्।
श्रीभक्तिसारत्वमतीव मान्यं
भक्ताङ्घ्रिरेणुत्वपरिष्कृतं तत् ॥ 6 ॥

आसाद्य सोऽयं कुलशेखरस्सन्
योगीन्द्रवाह्योऽपि भवत्यवन्याम्।
धनुष्पुरीमाधवपादपद्म
सेवाफलं वर्णयितुं क ईष्टे ॥ 7 ॥

धनुष्पुरीन्दोः कचशैवलाढ्यं
नेत्रोरुमीनं मुखपद्मसद्म।
यदन्तरङ्गं विनतस्य जन्तोः
ततस्सरो वा न हि वा स एषः ॥ 8 ॥

चिञ्चातरुतलनिलयमुनीश्वर
चिन्ताविहरणपदमेवायम्।
कार्मुकनगरीकालपयोदः
चिञ्चाभक्तं कथयति भुक्तम् ॥ 9 ॥

धनुष्पुरीमन्मथमन्मथस्य
सौन्दर्यमास्वादयितुं धरेयम्।
विचिन्त्य गोदेति जनिं प्रपेदे
श्रीधन्विनव्ये नगरेऽनुरूपम् ॥ 10 ॥

धनुष्पुरं वा किमु धन्विनव्य
पुरन्ध्वभूत् प्राक्तनमित्युदीतम्।
सन्देहमन्तः किल शान्तमेनं
नव्यं पदं नामगतं विधत्ते॥ 11॥

धनुष्पुरीनाथकृताभिलाषां
श्रीविष्णुचित्तस्स विलोक्य पुत्रीम्।
पदे पदे शार्ङ्गधनुस्समेतं
निजासु गाथासु मुदाभिधत्ते॥ 12॥

गोदानुभूत्या सततं भवन्त्या
धनुष्पुरीनायक एव गोदः।
जातस्स्वयं यन्मम चापि गोदः
यतो विभाति श्रितपारिजातः॥ 13॥

गिरिर्गिरीशस्य धनुः किलासीत्
पुण्ड्रं धनुः कस्यचिदस्य सूनोः।
पुरं धनुः किन्विदमस्य जातं
धनुष्पुरं नाम कुतोन्यथा स्यात्॥ 14॥

निर्यन्त्रणं परिणमन्ति न यावदेव -
माक्रुश्य शार्ङ्गधनुषा सहितं भवन्तम्।
आचार्यरत्नमवदत्तदिहात्र तं त्वा -
मभ्यागतं कथयतीव धनुष्पुरं नः॥ 15॥

आह श्रुतिः प्रणवमेव धनुश्शरान्तः
त्वां ब्रह्म लक्ष्यमिह नाम पुरे तदेवम्।
तस्मादिदं प्रणवपट्टणमेव मन्ये
चित्रं शरासनपुरे शरलक्ष्यवासः॥ 16॥

सीतामिव गोदामपि लब्धं किमु कामात्
किञ्चिद्धनुरस्यां भुवि सज्यं कृतवांस्त्वम्।
तेनाभवदेतत्किल नामात्र यथार्थं
मन्दस्मित ! मन्दं वद किञ्चिन्मम तत्त्वम्॥ 17॥

किं वा कुम्भभुवः कुठारमुनितो लब्धं धनुस्तत्त्वया
देशेऽस्मिन् निहितं हितं त्रिजगतां तस्माद्धनुष्पूरिति।
नामाभूदथवा धनुर्धनुरिति त्वन्मातृवत्त्वन्मये
मद्वंशोदितभक्तसत्तममणौ त्वद्व्याहृतेर्वा वद॥ 18॥

करधृतनवनीतं कालमेघाभिरामं
कमलनयनमेकं कल्पकं कामितानाम्।
कलभमिव विलोलं कान्तकल्याणरूपं
कलय हृदय ! कञ्चित् किञ्चिदुच्छूनकुक्षिम्॥ 19॥

नन्दनन्दनपदारविन्दयोः
स्यन्दमानमकरन्दसेवया।
तुन्दिलान् वयममन्दनन्दथून्
चापपत्तनजनानुपास्महे॥ 20॥

विद्यानिधेर्वेङ्कटशेषसूरेः
कटाक्षतो यः कविराजराजः।
स श्रीनिधिः श्रीनिधिराघवाख्यः
धनुष्पुरीनाथनुतिं वितेने॥ 21॥

॥ इति श्रीराजगोपालविंशतिः समाप्ता॥